# संस्कृत वार्ता:

दिनाङ्क : 09/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- शुभेंदु-अधिकारी पश्चिम-बङ्गालस्य प्रथमः भाजपा-मुख्यमन्त्री सञ्जातः। तेन सह पञ्चान्यैः मन्त्रिभिः अपि पद-गोपनीयतायाः शपथं गृहीतम्।
- तमिलनाडु-राज्ये सी. जोसेफ विजयस्य टी.वी.के. इति दलेन प्रमाणितं यत्, नूतन-सर्वकार-रचनायै तेषां पार्श्वे विंशत्युत्तर-शतं विधायाकानां समर्थनं वर्तते।
- राष्ट्रिय-विधिक-सेवा-प्राधिकरणेन अशेषे हि देशे विवादानां सौहार्दपूर्णरीत्या निस्तारणार्थं राष्ट्रिय-लोक-न्यायालयस्य आयोजनं विहितम्।
- विदेशमन्त्री डॉ. एस. जयशङ्करः द्विपक्षीय-सहयोगं सुदृढीकर्तुं त्रिनिदाद-एण्ड-टोबैगो देशस्य प्रधानमन्त्रिणा सह मेलनं साधितवान्।
- क्रिकेट-स्पर्धामालिकायाम् अद्य जयपुरनगरे राजस्थान रॉयल्सदलं गुजरात-टाइटन्स-दलेन सह क्रीडिष्यति।

-----------------------------------------------

<u>पश्चिमबंगाल- शुभेन्दुः शपथं</u>

शुभेन्दुः अधिकारी पश्चिमबंगालस्य नूतनमुख्यमन्त्रित्वेन शपथं गृहीतवान्। इत्थं पश्चिमबङ्गालराज्ये प्रथमं तावत् भाजपादलस्य प्रशासनं सङ्घटितं जातम्। अवधेयं यत् भाजपादलं विधानसभा-निर्वाचनेषु ऐतिहासिकं जयं समर्ज्य तृणमूल कांग्रेसदलस्य पंचदश-वर्षात्मकस्य शासनस्य अन्तं कृतवत्। कोलकातानगरस्य ब्रिगेड परेड ग्राउंड इति स्थले राज्यपालः आर एन रविः श्री शुभेंदुअधिकारिणं पदगोपनीयतायै प्रतिश्रावितवान्। तेन सह पञ्चान्यैः मन्त्रिभिः अपि पद-गोपनीयतायाः शपथं गृहीतम्।

-----------------------------------------------

<u>तमिलनाडु-नूतनसर्वकारः</u>

तमिलनाडु-राज्ये नूतन-सर्वकार-रचनायै TVK-दलेन प्रमाणितं यत् तेषां पार्श्वे विंशत्युत्तर-शतं विधायाकानां समर्थनं वर्तते । चतुस्त्रिंशदधिक-द्विशतं सदस्यानां विधानसभायां बहुमताय अष्टादशोत्तर-शतं विधायाकाः आवश्यकाः आसन् ।

चेन्नई-नगरे वार्ताहरैः सह भाषमाणः टीवीके-दलस्य नेता अधव-अर्जुनः अवदत् यत्, VCK तथैव इण्डियन-यूनियन-मुस्लिम-लीग (IUML) इत्युभाभ्यां दलाभ्यां तस्मै पक्षाश्रयं विना समर्थनं प्रदत्तम्।

अधुना निर्वाचने अष्टाधिकैकशतं आसनानि जित्वा टीवीके सर्वबृहत्तम-दलत्वेन उद्भूतम्। यद्यपि दलनेता सी. जोसेफ विजयः द्वयोः क्षेत्रयोः विजयी जातः, अतः तेन एकं स्थानं परित्यक्तं भविष्यति, येन दलस्य संख्या सप्तधिकैकशतं भविष्यति । तथापि काङ्ग्रेस-दलस्य पञ्च विधायाकाः, सीपीआई, 'सीपीआई-एम, वीसीके तथा आईयूएमएल इत्येतेषां प्रत्येकं द्वौ-द्वौ विधायाकौ च मिलित्वा सहायक-दलानां कुल-संख्या त्रयोदश वर्तते, येन बहुमतस्य मार्गः प्रशस्तः जातः।

---

## राष्ट्रिय-विधिकसेवा-प्राधिकरणम

राष्ट्रिय-विधिकसेवा-प्राधिकरणम् अद्य सम्पूर्णदेशे ऐषमः द्वितीय-राष्ट्रिय-लोक-न्यायालयस्य आयोजनं विदधाति। प्राधिकरणस्य सदस्य-सचिवः संजीव-पाण्डेयः आकाशवाणीम् ज्ञापयत् यत् लोक-न्यायालये सहमतेः योग्येषु आपराधिक-प्रकरणेषु वादश्रवणं विधीयते। अस्य आयोजनस्य उद्देश्यं न्यायालयेषु लम्बित-प्रकरणानां सहमत्यानुसारं निस्तारणं वर्तते। श्री पाण्डेयः अवोचत् यत् त्रयोविंशत्यधिक-द्विसहस्रतमाब्दात् पञ्चविंशत्यधिक-द्विसहस्रतमाब्दं यावत् द्वादश-राष्ट्रिय-लोक-न्यायालयानाम् आयोजनं विधाय षडविंशतिः कोटि-प्रकरणानां समाधानम् अभवत्।

---

## जयशंकरः भारत-त्रिनिदाद-टोबैगो

विदेशमंत्री सुब्रह्मण्यम जयशंकरः भारत-त्रिनिदाद-टोबैगो देशानां मिथः पारम्परिक-सम्बन्धानां प्रशंसाम् अकरोत्। त्रिनिदाद-टोबैगो इत्यस्य विदेश तथा कैरिकॉमप्रकरणानां मंत्रालयस्य समारोहे डॉ. जयशंकरेण द्वयोः देशयोः प्रगाढ-सांस्कृतिक-सम्बन्धानाम् अथ ऐतिहासिकतायाः उल्लेखं कृतम्। भारतस्य त्रिनिदाद- टोबैगो अमुना सह परंपरागतरूपेण मैत्रीपूर्णाः सम्बन्धाः वर्तन्ते। उभयोः देशयोः जनाः वेशभूषां क्रीडाम् आहारव्यवहारं च समेत्य परम्पराः यावत् नैकेषु विषयेषु साम्यं सन्धदते। डॉ. जयशंकरेण प्रधानमंत्रिणा कमला-प्रसाद-बिसेसरवर्येण सह मेलनं विधाय द्विपक्षीय-सहयोगं इतोऽपि सुदृढीकर्तुं चर्चा कृता। यात्रावधौ पर्यटनं विदेश-कैरिकॉम मंत्रालय-भवनस्य सौरोर्जा संचालनं विविध-परियोजनाः अथ च आयुर्वेदकेन्द्रस्य स्थापनां समेत्य नैकेषु विषयेषु सहमतिः जाता।

---------------------------------------------

## प्रधानमंत्री- आर्ट ऑफ लिविंग

प्रधानमंत्री नरेन्द्रमोदी श्वः कर्नाटकस्य बेंगलुरुनगरे आर्ट ऑफ लिविंग इत्येतस्य संस्थानस्य पञ्चचत्त्वारिंशत्तमीं वर्षपूर्तिम् उपलक्ष्य आयोजयिष्यमाणे समारोहे सहभागितां करिष्यति। श्रीमोदी आर्ट ऑफ लिविंग इंटरनेशनल सेंटर इत्यत्र नवनिर्मितं ध्यानमंदिरम् अपि उद्घाटितवान्। ततः परं प्रधानमंत्री मोदी हैदराबादनगरे प्रायः सार्धनव-सहस्र-कोटितोऽप्यधिक- रूप्यकाणां अनेकासां विकास-परियोजनानां शिलान्यासं, लोकार्पणं च करिष्यति। प्रधानमन्त्री मोदी तत्र हैदराबाद-पणजी-आर्थिक-वीथिकायां राष्ट्रीयराजमार्गस्य चतुःभागपरस्य निर्माणस्य आधारशिलां अपि स्थापयिष्यति। तत्रैव प्रधानमंत्री वारंगलस्थले पीएम मित्रा पार्क इत्येतस्य उद्यानस्य उद्घाटनं करिष्यति। सममेव श्री मोदी हैदराबाद् अत्याधुनिकं कर्करोगपरं चिकित्सालयम् अपि लोकार्पयेत्।

---------------------------------------------

## रबींद्रनाथठाकुर-जयन्ती

अद्य गुरूदेवस्य रबींद्रनाथठाकुरस्य पंचषष्ट्यधिकैकशततमी जयन्ती अस्ति। दिनम् इदम् उपलक्ष्य शांतिनिकेतनं, विश्वभारती-विश्वविद्यालयम् अथ बांग्लादेशं समेत्य जगतः अनेकेषु

स्थलेषु सांस्कृतिक-कार्यक्रमाः समायोजिताः। उपराष्ट्रपतिः सी पी राधाकृष्णनवर्यः, प्रधानमंत्री नरेंद्रमोदी, गृहमंत्री अमित शाहः अथ रक्षामंत्री राजनाथसिंहः पोचीशे बोइशाख इत्येतस्य अवसरे गुरुदेवाय श्रद्धांजलिम् अर्पितवन्तः।

-----------------------------------------------

## मुंबई-भारतीयरिज़र्वबैङ्कः

भारतीय-रिज़र्व-बैङ्क इत्यनेन नियामक-निर्देशानां तथा च KYC- मानकानाम् उल्लङ्घनमुद्दिश्य हिन्दुजा-हाउसिङ्ग-फाइनेन्स सहैव यस-बैङ्क इत्यनयोः उपरि मौद्रिक-दण्डः आरोपितः। पृथक्-पृथक् वक्तव्येषु भारतीय-रिज़र्व-बैङ्केन सूचितं यत्, तेन हिन्दुजा-हाउसिङ्ग-फाइनेन्स इत्यस्योपरि एक-दशमलव-अष्ट-शून्यलक्षरूप्यकाणां दण्डः स्थापितः। अपरत्र यस-बैङ्क इत्यस्योपरि एकत्रिंशद्दशांश-अशीति-लक्षरूप्यकाणां दण्डः आरोपितः।

-----------------------------------------------

## केरलम्-ऋतुविभागः

भारत-ऋतु-विज्ञान-विभागेन आगामि-पञ्च-दिवसेषु केरलम राज्यस्य विविध-जनपदेषु विद्युत्पातेन प्रचण्ड-वायुना च सह अतिवृष्टेः पूर्वानुमानं प्रकटितम्। विभागेन अद्य राज्यस्य नवजनपदेषु पीतवर्णीया सञ्चेतना प्रसारिता। श्वः अपि सञ्चेतना तावत् सप्तजनपदेषु यथावस्थं कार्यान्विता भविष्यति। प्रतिकूल-वातावरणस्य कारणात् मत्स्याजीविभ्यः अद्य केरल-लक्षद्वीप-तटेषु गमनपरिहारार्थं परामर्शः प्रदत्तः। यद्यपि कर्नाटक-तटेषु मत्स्य-ग्रहणार्थं तादृशः कश्चन प्रतिबन्धः नास्ति।

-----------------------------------------------

## आईपीएल

आईपीएल क्रिकेट-स्पर्धामालिकायाम् अद्य राजस्थान रॉयल्सदलं गुजरात-टाइटन्स-दलेन सह क्रीडिष्यति। भारतीय- समयानुसारेण इयं स्पर्धा सायं सार्ध-सप्तवादने जयपुरनगरे आरप्स्यते। अवधेयं यत् अंक-तालिकायां राजस्थानदलं चतुर्थे गुजरातदलं च पञ्चमे स्थाने स्तः।

।। इति वार्ता: ।।